# प्रथमोऽध्यायः ।

## पाणिनीयं मतम् (अथवा) पाणिनीयं व्याकरणम् (व्यक्तित्वं कर्तृत्वं च) ।

### (अ) मुखं व्याकरणं स्मृतम् ।

व्याकरणशब्दस्य व्युत्पत्तिः अथवा किं नाम व्याकरणम् इति विषये विचार्यते यत् अयं व्याकरणशब्दः 'वि' एवम् 'आ' उपसर्गाभ्यां सह 'कृ' धातोः करणे ल्युट्- प्रत्ययेन (यु-प्रत्ययस्य अन-आदेशेन) व्याकरणशब्दः निष्पद्यते । संस्कृतभाषायाः तच्छब्दानां सम्यज्ज्ञानार्थम् इदं व्याकरणम् अत्यावश्यकम् । व्याकरणमेव शब्दानुशासनम् । कारणं तु तत्र शब्दानां मीमांसा कृता वर्तते । व्याकरणस्य प्रयोजनं शब्दानां व्युत्पत्तिप्रदर्शनम् ।

''व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम् ।''(१)

अर्थात् अर्थविशेषमाश्रित्य स्वरप्रकृतिप्रत्ययादि विशेषादीन् विदधत् पदखण्डार्थविशेषज्ञापकः । वि=विशेषेण अर्थात् संस्कारविशेषेण आ = समन्तात् वैदिकान् लौकिकांश्च शब्दान् करोति तथाभूतः पाणिन्यादिमहर्षिप्रणीतो ग्रन्थराशिः (२)

व्याकरणं प्राचीनतमं वर्तते । वेदकालादारभ्य तस्य प्रचारः प्रसारश्च अद्ययावद् वर्तते । व्याकरणं ग्रन्थरूपेण नवविधम् अस्ति यथा -

ऐन्द्रं चान्द्रं काशकृस्नं कौमारं शाकटायनम् ।
सारस्वतं चापिशलं शाकलं पाणिनीयकम् ॥ (३)

इत्येतत्पद्यानुसारेण भगवान् इन्द्रः व्याकरणस्य सर्वप्रथमः वक्ता कर्ता च इति ज्ञायते । प्राक्-पाणिनेः अनेके वैयाकरणाः आसन् किन्तु साम्प्रतं सर्वत्र पाणिनीयव्याकरणं प्रचलति । इदमेव व्याकरणम् अद्यापि नितरामेव सुसमृद्धं, सुसम्पन्नं, सुललितं, सर्वाङ्गीणं व्याकरणञ्च विद्यते । संस्कृतव्याकरणशास्त्रस्येतिहासस्य लेखकाः श्रीयुधिष्ठिरमीमांसकाः स्वकीये ग्रन्थे निर्दिशन्ति यत्-प्राक्पाणिनेः त्रयोदशवैयाकरणाः आसन् । बहूनि प्रमाणानि समुध्धृत्य श्री युधिष्ठिरमीमांसकाः कथयन्ति यत् सञ्जातस्य पाणिनेः साम्प्रतिकात् कालात् ४८२१ वर्षाण्यतितानि । (४)

परमाधुनिकानां पाश्चात्यानां विपश्चितां तु मतं यत् पाणिनेर्जातस्य प्रायः २८०० वर्षाणि व्यतीतानि । (५) केषाञ्चिदाचार्याणां मतेन व्याकरणं ग्रन्थरूपेण अष्टविधं यथा -

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ हि शाब्दिकाः ॥ (६)

एवञ्च भगवान्पाणिनिः स्वकीयायाम् अष्टाध्याय्यां दश प्राचीनान् व्याकरणाचार्यान् सादरं स्मरति ।

**(१) शाकल्यः** - (७) भगवान्पाणिनिः अष्टाध्याय्यां चतुर्षु सूत्रेषु शाकल्यं सादरं स्मरति यथा-

(१) सम्बुद्धौ शाकल्यस्येतावनार्षे । (१, १.१६)

(२) इको सवर्णे शाकल्यस्य ह्रस्वश्च । (६, १.१२७)

(३) लोपः शाकल्यस्य । (८, ३.१६)

(४) सर्वत्र शाकल्यस्य । (८, ४.५१)

अत्र शाकल्यपदं तद्धितप्रत्ययान्तं वर्तते । तदनुसारेण शाकल्यस्य पितामहनाम 'शकल' इत्यासीत् । संस्कृतवाङ्मये चत्वारि नामानि शाकल्यस्य कृते प्राप्यन्ते । शाकल्यस्य कालः प्रायः वैक्रमात् २८०० वर्षाणि पूर्वं निश्चितो भवति । पाणिनीयव्याकरणे तथा च प्रातिशाख्येषु उद्धृतमतानुसारेण प्रतीतिर्भवति यत् शाकल्यव्याकरणे लौकिकं वैदिकम् इत्युभयशब्दानाम-न्वाख्यानमासीत् । वायुपुराणमतेन

''वेदमित्रस्तु शाकल्यो महात्मा द्विजसत्तमः ।

चकार संहिताः पञ्च बुध्धिमान् पदवित्तमः ॥'' (८)

शाकल्यस्यापरे ग्रन्थाः सन्ति यथा- (१) शाकलचरितम् (२) ऋग्वेदीयपदपाठः इत्यादयः । (९)

**(२) काश्यपः** :- पाणिनीयव्याकरणे काश्यपस्य मतं स्थानद्वये उद्धृतमस्ति यथा- (१) तृषिमृषिकृषेः काश्यपस्य (१, २, २५ ) (२) नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् (८,४,६७.) । काश्यपशब्दः गोत्रप्रत्ययान्तः अस्ति । तदनुसारेण मूलपुरुषस्याभिधानं कश्यपः वर्तते । पाणिनीयशब्दानुशासनेन एवं ज्ञायते यत् अयं काश्यपः पाणिनेः पूर्ववर्ती । वार्तिककारकात्यायन-मतेन अष्टाध्याय्यां - ''काश्यपकौशिकाभ्यामृषिभ्यां णिनिः'' (४,३ १०३) इति सूत्रे काश्यपकल्पस्य निर्देशो वर्तते । तदिदं काश्यपव्याकरणं नोपलभ्यते । केवलं तस्य मतस्य उल्लेखः त्रिषु स्थानेषूपलब्धो भवति । आयुर्वेदविषये काश्यपसंहिता प्रकाशिता वर्तते । (१०)

**(३) शाकटायनः** :- पाणिनीयाष्टाध्याय्यां शाकटायनस्योल्लेखः त्रिरुपलभ्यते, यथा- (१) लङः शाकटायनस्य (३,४ ११. ) (२) व्योर्लघुप्रयत्नतरः शाकटायनस्य (८, ३. ११. ) (३) त्रिप्रभृतिषु शाकटायनस्य (८, ४. ५) । भगवता यास्केनाऽपि निरुक्ते शाकटायनमतं उद्धृतं वर्तते । भगवता पतञ्जलिनाऽपि महाभाष्ये (३,३. १) स्पष्टतया व्याकरणशास्त्रस्य प्रवक्तृरूपेण शाकटायनःनिर्दिष्टः ।

शाकटायनस्य पितुर्नाम 'शकट' इत्युपदिष्टम्। भगवता पाणिनिनाऽपि ''नडादिभ्य: फक्'' (४,१.९६) इति सूत्रे शकटशब्द: नडादिगणे पठित:। वामन: काशिकायां 'नाचार्य राजर्त्वि-संयुक्तज्ञात्याख्येभ्य:' (६, २.१३३) इति सूत्र व्याख्यायां 'शाकटायनपुत्र:' इत्युदाहरणं ददाति। इदमेवोदाहरणं रामचन्द्रेण तथा च भट्टोजिदीक्षितेनापि प्रदत्तम्। महाभाष्ये (३, २. ११५) तस्य जीवनविषये एक: प्रसङ्ग: वर्ण्यते यथा ''भवति वै कश्चित् जाग्रदपि वर्तमानकालं नोपलेभे''। तद्यथा वैयाकरणानां शाकटायनो रथमार्गे आसीन: शकटसार्थं यन्तं नोपलेभे।

महाभाष्ये अनेनोल्लेखेन ज्ञायते यत् शाकटायनस्य जीवनस्यायं कश्चित् महत्वपूर्ण: प्रसङ्ग: वर्तते। अन्यथा महाभाष्ये तस्योल्लेख: न कृत: स्यात्। काशिकायाम् (१,४.८६) अपरमुदाहरणं वर्तते यत्- ''अनुशाकटायनं वैयाकरणा:'' अर्थात् सर्वे वैयाकरणा: शाकटायनात् हीना:। अन्यदप्युदाहरणं वर्तते यत्, ''उपशाकटायनं वैयाकरणा: इति। यास्कविरचितनिरुक्ते शाकटायनस्य मतं ''नामानि आख्यातजानि'' इति निर्दिष्टम्। यद्यपि शाकटायनव्याकरणमद्याप्यनुपलभ्यते तथापि शाकटायनेन रचिता: अन्ये ग्रन्था: लभ्यन्ते यथा (१) दैवतग्रन्थ: (२) कोष: (३) ऋक्तन्त्रम् (४) लघुऋक्तन्त्रम् (५) सामतन्त्रम् (६) पञ्चपादी उणादिसूत्राणि (७) श्राद्धकल्प:। (११)

**(४) सेनक:** :- भगवान् पाणिनि: सेनकाचार्यस्य उल्लेखं केवलमेकस्मिन्नेव सूत्रे करोति यथा- ''गिरेश्च सेनकस्य'' (५, ४.११.)। केवलमष्टाध्याय्यामेव सेनकस्योल्लेख: प्राप्यते, नान्यत्र।

**(५) आपिशलि:** - आपिशले: आचार्यस्य उल्लेख: पाणिने: अष्टाध्याय्यामेकस्मिन्नेव सूत्रे वर्तते यथा- ''वा सुप्यापिशले: (६,१.९२.)। महाभाष्येऽपि आपिशले: मतं प्रमाणरूपेण उद्धृतं वर्तते। अपिशलस्यापत्यं आपिशलिराचार्य:। पाणिनीयाष्टके आपिशले: साक्षादुल्लेखात् निश्चितं भवति यत् स: प्राक्पाणिने: सञ्जात:। आपिशलिपदं छात्रादिगणे पठितं वर्तते। (१२) अपरं च जैनाचार्य: पाल्यकीर्ति: शाकटायनव्याकरणस्य **अमोघवृत्तौ** (३,२.९१) उदाहरणेन प्रदर्शयति यत् ''अष्टका आपिशलिपाणिनीया:''। तेन ज्ञायते यत् आपिशलिव्याकरणे अष्टौ अध्याया: आसन्। आपिशलिविरचिते शिक्षाग्रन्थेऽपि अष्टौ अध्याया: सन्ति। (१३)

**(६) स्फोटायन:** – भगवता पाणिनिना स्फोटायनस्योल्लेख: केवलमेकस्मिन्नेव सूत्रे कृतो वर्तते। यथा - ''अवङ् स्फोटायनस्य (६,१.१२३)। तस्योल्लेख: मतञ्च नान्यत्र विद्यते। कलिकालसर्वज्ञ हेमचन्द्राचार्य:अभिधानचिन्तामणिकोशे ज्ञापयति यत् ''स्फोटायने तु कक्षीवान् इति (१४) केशवोऽपि ईदृशं मतं प्रस्थापयति। अनेनेदं ज्ञायते यत् स्फोटायन: कक्षीवान् इत्यस्य नाम आसीत्।

पाणिनीयाष्टाध्याय्यां स्फोटायनस्योल्लेखेनेदमवश्यं ज्ञायते यत् सः विक्रमात् २८०० वर्षाणि प्राचीन: आसीत् । (१५)

**(७) चाक्रवर्मण:** – चाक्रवर्मणस्य नाम पाणिनीयाष्टाध्याय्याम् एवम् उणादिसूत्रेषु लभ्यते यथा- (१)ई चाक्रवर्मणस्य (६, १. १३०) (२) ''कपश्चाक्रवर्मणस्य'' (पञ्च.उ.३.१४४) (दश.उ.७.११.) । भट्टोजिदीक्षितमहाभागैरपि शब्दकौस्तुभे तस्य मतस्य उल्लेख: कृत: । चाक्रवर्मणस्य व्याकरणविषये संदिग्धता वर्तते । (१६)

**(८) भारद्वाज:** - भारद्वाजस्योल्लेख: पाणिनीयाष्टाध्याय्यां केवलमेकस्मिन्नेव स्थाने उपलभ्यते । यथा ''ऋतो भारद्वाजस्य'' (७,२.६३) । अष्टाध्याय्यां भारद्वाजशब्दः कृकणपर्णाद् भारद्वाजे (४, २.१४५) इति सूत्रे देशवाचित्वे प्राप्यते । पाणिनीयाष्टके तस्योल्लेखेन निश्चीयते यत् तस्य काल: वैक्रमात् २८०० वर्षेभ्य: प्राक् आसीत् । भारद्वाजीयव्याकरणस्य मतं केवलं प्राचीनग्रन्थेष्वेवोपलभ्यते । अत: तस्य स्वरूपसम्बन्धे एवं परिमाणादिविषये किञ्चिदपि विशेषज्ञानं नोपलभ्यते । महाभाष्ये नैकेषु स्थानेषु भारद्वाजीयवार्तिकानां निरूपणं समुपलभ्यते । तैर्महाभागै: अन्येऽपि ग्रंथाः विरचिताः यथा- (१) आयुर्वेद संहिता (२) अर्थशास्त्रमित्यादि । (१७)

**(९) गार्ग्य:** - पाणिनीयाष्टाध्याय्यां गार्ग्यस्योल्लेख: त्रिषु स्थानेषूपलभ्यते यथा । (१) अड् गार्ग्यगालवयो: (७,३.९९) (२) ओतो गार्ग्यस्य (८,३.२०) (३) नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् (८,४.६७) । इदं गार्ग्यव्याकरणं सर्वाङ्गपूर्णमासीदिति तस्य सूक्ष्मपर्यवेक्षणेन विदितं भवति ।

गर्गस्य गोत्रापत्यं पुमान् गार्ग्य: इत्येनेन ज्ञायते यत् गार्ग्यपदं गोत्रप्रत्ययान्तं वर्तते । तद्विषये इत्येवं ज्ञायते यत् गर्ग: भारद्वाजस्य पुत्र: आसीत् । अन्येष्वपि ग्रन्थेषु गार्ग्यस्योल्लेख: प्राप्यते । सामवेदस्य पदपाठमपि गार्ग्यविरचितं मन्यते । भगवतः गार्ग्यस्य मतं पाणिनीयाष्टाध्याय्याम् अथ च यास्कस्य निरुक्ते (१८) उद्धृतम् अस्ति । अतः गार्ग्य: वैक्रमात् प्रायः ३१०० वर्षाणि प्राचीन: अस्ति । प्राचीनवाङ्मये गार्ग्यस्य निम्नदर्शितानि पुस्तकानि लभ्यन्ते । (१) निरुक्तम् (२) सामवेदस्य पदपाठ: (३) शालाक्यतन्त्रम् (४) तक्षशास्त्रम् (५) देवर्षिचरितम् (६) सामतन्त्रम् । (१९)

**(१०) गालव:** – पाणिनीयाष्टाध्याय्यां गालवस्योल्लेखः चतुर्षु स्थानेषु प्राप्यते । यथा -

(१) इको ह्रस्वोऽङ्यो गालवस्य (६, ३.६१) (२) तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य (७, १.७४) (३) अड् गार्ग्यगालवयोः (७, ३.९९) (४) नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् (८, ४,६७)। स वैक्रमात् ३१०० वर्षाणि पूर्वं सञ्जातः। अनेन गालवेन अन्येऽपि ग्रन्थाः रचिताः यथा- (१) संहिता (२) ब्राह्मणः(३) क्रमपाठः (४) शिक्षा (५) निरुक्तम् (६) दैवतग्रन्थः (७) शालाक्यतन्त्रम् (८) कामसूत्रम् ॥ (२०)

## (आ) पाणिनिः, तस्याऽष्टाध्यायी।

पाणिनेः जन्मविषये काचित् जिज्ञासा स्यादिति स्वाभाविकम्। श्रीपुरुषोत्तमदेवमहानुभावेन भगवतः पाणिनेः षड्नामानि दर्शितानि। (२१) यथा पाणिनः, पाणिनिः, दाक्षीपुत्रः, शालङ्किः, शालातुरीयः, आहिकः इति।

तस्य जन्मसमयविषये विद्वत्समाजे मतमतान्तराणि सन्ति। केचन (२२) मन्यन्ते यत्- अयं पाणिनिः जन्मेजयराज्ञः समये जन्म लेभे। अपरे (२३) मन्यन्ते यत् अयं पाणिनिः खिस्त्राब्दस्य पूर्वं पञ्चमशताब्द्यां सञ्जातः।

श्रीयुधिष्ठिरमीमांसकमतानुसारेण (२४) पाणिनेः जन्मसमयः विक्रमसंवत् २८०० वर्तते।

"पाणिनिस्त्वाहिकोदाक्षीपुत्रः शालङ्किपाणिनौ" (२५)

पणोऽस्यास्तीति पणी तस्य गोत्रापत्यं पाणिनः, तस्य युवापत्यं पाणिनिः। अनया व्युत्पत्त्या पाणिनेः पितुर्नाम पाणिन इति सुस्पष्टम्। पञ्जाब (पञ्चनद) प्रान्ते गान्धारदेशे शालातुरं (लाहुर - लाहोर) नाम सुप्रसिद्धं ग्रामं वर्तते। अभिजनार्थे शालातुरीयः इति प्रयोगः सम्भूतः।

यत्र पूर्वैरुषितं सोऽभिजनः। यत्र च (स्वेन) सम्प्रत्यूष्यते स निवासः। (२६)

इति नियमानुसारेण अभिजन-निवासयोरर्थे वैपरीत्यात् इदमनुमीयते यत् पाणिनेः पूर्वजाः शालातुरग्रामे न्यवसन्। एवं पाणिनिः केषाञ्चिन्मतानुसारेण (२७) आहिक (वाहिक) देशे अथवा तस्य समीपे न्यवसत्। पं. -श्रीशिवदत्त -(२८) मतानुसारेण पाणिनेः पितुर्नाम 'शलङ्क' इत्यासीत्। तस्य मातुर्नाम दाक्षी आसीत्। केचन (२९) विद्वांसः मन्यन्ते यत् पाणिनेः नाम आहिकः आसीत्। किन्तु तेन 'पाणिनि' नाम्नि गोत्रे जन्म लेभे।

अतः गोत्रानुसारेण पाणिनिः इति अभिधानं समजनि । तस्य जन्मकालः विक्रमात् ५०० वर्षाणि पूर्वं मन्यते ।

भगवता पाणिनिना व्याकरणमधिकृत्य शब्दानुशासनम् अष्टाध्यायी नाम्ना विरचितम् । अस्याम् अष्टाध्याय्याम् अष्टौ अध्यायाः सन्ति । प्रत्येकस्मिन्नध्याये चत्वारः पादाः सन्ति । सर्वं मिलित्वा ३२ पादाः सन्ति । अष्टाध्यायीक्रमेण सूत्रसंख्या अधोनिर्दिष्टप्रकारेण परिगणिता वर्तते ।

| अध्यायः | पादः १ | पादः २ | पादः ३ | पादः ४ | सम्मील्य |
|---|---|---|---|---|---|
| १ | ०७५ | ०७३ | ०९३ | ११० | ३५१ |
| २ | ०७२ | ०७८ | ०७३ | ०८५ | २६८ |
| ३ | १५० | १८८ | १७६ | ११७ | ६३१ |
| ४ | १७८ | १४५ | १६८ | १४४ | ६३५ |
| ५ | १३६ | १४० | ११९ | १६० | ५५५ |
| ६ | २२३ | १९९ | १३९ | १७५ | ७३६ |
| ७ | १०३ | ११८ | १२० | ०९७ | ४३८ |
| ८ | ०७४ | १०८ | ११९ | ०६८ | ३६९ |
| मिलित्वा- | १०११ | १००९ | १००७ | ९५६ | ३९८३ |

अष्टाध्याय्या एषा सूत्रसंख्या (३९८३) 'निर्णयसागरप्रेस' मुम्बापुर्याः सिद्धान्तकौमुद्यनुसारेण अस्ति । किन्तु वैद्य-श्रीभीमसेनशास्त्रीमहाभागानां मतानुसारेण (३०) अष्टाध्याय्याः सूत्रसंख्यायाः अभ्यासेनेदं ज्ञायते यत्- प्रथमाध्यायस्य, द्वितीयाध्यायस्य, चतुर्थाध्यायस्य, षष्ठाध्यायस्य प्रथमेपादे, एवञ्च प्रथमाध्यायस्य चतुर्थेपादे भिन्नसंख्याकत्वं वर्तते । वैद्यश्रीभीमसेनशास्त्रिमहाभागानां मतेन प्रथमाध्यायस्य प्रथमे पादे ७४ सूत्राणि सन्ति,किन्तु 'निर्णयसागर प्रेस' इत्यस्य सिद्धान्तकौमुद्यनुसारेण ७५ सूत्राणि सन्ति । एवञ्च द्वितीयाध्यायस्यापि 'निर्णयसागर प्रेस' अनुसारतः ७२ सूत्राणि सन्ति । किन्तु वैद्यश्रीभीमसेनशास्त्रीमहाभागानां मतानुसारेण ७१ सूत्राणि सन्ति । चतुर्थाध्यायस्य प्रथमेपादे 'निर्णयसागर प्रेस' अनुसारेण १७८ सूत्राणि सन्ति, किन्तु श्री भीमसेनशास्त्रीमहोदयानां मतेन १७६ सूत्राणि सन्ति । षष्ठाध्यायस्य प्रथमे पादेऽपि 'निर्णयसागर प्रेस' अनुसारेण २२३ सूत्राणि सन्ति, किन्तु श्री भीमसेनशास्त्रीमहोदयानां मतानुसारेण २१८ सूत्राणि वर्तन्ते । अथ च 'निर्णयसागर प्रेस' मतानुसारेण प्रथमाध्यायस्य चतुर्थे पादे ११० सूत्राणि सन्ति ।

किन्तु वैद्यश्रीभीमसेनशास्त्रीमहोदयानां मतेन १०९ सूत्राणि वर्तन्ते। गोल्डस्ट्युकर (३१) महोदयाः मन्यन्ते यत्-

'त्रीणि सूत्रसहस्राणि तथा नवशतानि च'।
षण्णवति च सूत्राणां पाणिनिः कृतवान् स्वयम्'॥

एवं सभापतिशर्मोपाध्यायमतेन (३२)

चतुःसहस्रीसूत्राणां पञ्चसूत्रीविवर्जिता।
अष्टाध्यायी पाणिनीया सूत्रैः माहेश्वरैः सह॥''

इति प्रमाणमपि विद्यते। श्री एस.के.बेलवलकरलिखिते '' सीस्टम्स् ऑफ संस्कृत ग्रामर'' नाम्नि पुस्तके (३३) पठ्यते यत् भगवतः पाणिनेरष्टाध्याय्यां चतुःसहस्र सूत्राणि सन्ति। तेषु मध्ये केवलं पञ्चसूत्राणां (३४) कर्तृत्व-विषये सन्देहो वर्तते। यतः महाभाष्ये तेषां पञ्चसूत्राणां गणना पूर्ववर्तिसूत्राणां वार्तिकत्वेन वर्तते। अनेन प्रकारेण 'निर्णयसागर प्रेस' प्रकाशित-सिद्धान्तकौमुदीगणनां स्वीकृत्य भगवता पाणिनिना सर्वं मिलित्वा ३९८३ सूत्राणि विरचितानि।

## (इ) सूत्रलक्षणविवेचनम्। -

अत्र सर्वत्र 'सूत्रं' वा 'सूत्राणि' इति पदं वारंवारम् आयाति। तदा किं नाम सूत्रम्? इत्यपेक्षायां कथ्यते यत् -

''अल्पाक्षरमसंदिग्धं सारवद् विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥ (३५)

इत्येवं सामान्यतया सूत्रशब्दस्य व्यारव्या वर्तते।

सूत्रमल्पाक्षरं भवेत्, किं वा ''अल्पाक्षरत्वे सति बह्वर्थ ज्ञापकत्वं सूत्रत्वम्''। यथा उदाहरणतया भगवान् पाणिनिः कथयति यत्-आद्गुणः (६-१-८७) इति सार्धपञ्चमात्रात्मकमल्पसूत्रं वर्तते, तस्यार्थस्तु अवर्णाद् अचि परे पूर्वपरयोः एको गुण आदेशःस्यात्। आद्गुणः इत्यल्पाक्षरयुक्तं सूत्रं निरूपितम्।

(२) **असंदिग्धम्** – अर्थात् सूत्रं संशयरहितं स्यात्। अस्मिन् सूत्रे 'आत्' इति अवर्णस्य पञ्चम्यन्तं पदं, ''गुणः'' इति च अदेङ्गुणः (१, २.२) इति संज्ञासूत्रस्य विषयनिर्देशकं पदं अ- ए - ओ इति। इत्यर्थः

(३) **सारवत्** –अर्थात् सारः, सत्वं, अर्थः वा। सारवत् इत्यस्य अर्थवत् सूत्रं भवितव्यम्। अथ 'आद्' इति पदे पञ्चमीनिर्देशेन,'तस्मादित्युत्तरस्य'(१, १.६७) इति परिभाषया अवर्णात् इत्यर्थो

निष्पद्यते । 'गुणः' इति च प्रथमाविभक्तिमुपयुज्य, प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (२, ३.४६) इति विधिसूत्रेण गुणः विहितः ।

(४) **विश्वतोमुखम्** – अर्थात् सूत्रं सर्वत्र उपयोगि भवेत् । यत्र यत्र च अवर्णात् परस्य कार्यं साधयितव्यं भवेत् यत्र च गुणादेशः साधयितव्यो भवेत्, तत्र तत्र सर्वत्र निरपवादरूपेण अस्य सूत्रस्य विधिः कर्तव्यः।

(५) **अस्तोभम्** – अर्थात् स्तोभरहितम् । आद्गुणः (१, १.२) इति सूत्रं संज्ञापेक्षया, परिभाषापेक्षया, अर्थापेक्षया च संशयरहितत्वात्, सर्वत्रोपयुज्यमानत्वात् च कुत्रापि स्तोभं न भजते । नदीप्रवाहवत् अस्खलितरूपेण अस्य सूत्रस्यार्थः स्फुटति ।

(६) **अनवद्यम्** – अर्थात् दोषरहितम् । लक्षणं त्रिदोषशून्यं भवेत् । दोषत्रयं तु (१) अव्याप्तिः (२) अतिव्याप्तिः (३) असंभवाभिधम्। आद्गुणः (१-१-२) इदं सूत्रं यत्र यत्र प्रयुज्यमानं स्यात् तत्र तत्र निःशङ्कं प्रवर्तते इति हेतोः नात्र अव्याप्तिदोषः । इदं सूत्रं अवर्णात् परेषां अन्येषां विषयप्रदेशानां व्याप्तिमकृत्वा अतिव्याप्तिदोषात् मुक्तिं भजते । अथ च 'आद्' इति पदं अर्थस्यासंभवे 'गुणः' इति च पदं संज्ञार्थस्य, परिभाषार्थस्य च असंभवे न वर्तते । उभे अपि पदद्वयं स्वकार्यं कृत्वा, स्वकार्यस्य अस्तित्वं प्रकटयति इति हेतोः नात्राऽसंभवदोषः ।

एवमल्पाक्षरमसंदिग्धमिति सूत्रलक्षणं संक्षेपेण प्रदर्शितम् । सर्वाण्यपि अपराणि अष्टाध्यायीप्राप्तसूत्राणि एवं प्रकारेण बोध्यानि ।

अत्र अल्पाक्षरत्वम्- इति लक्षणस्य अत्यावश्यकाक्षराणि इति प्रतिपत्तव्यम् । न तु अल्पाक्षरत्व-साधनाय आवश्यकानामपि पदानामल्पत्वं साधनीयमित्यलं बहुविस्तरेण ।

**अथ सूत्रप्रकाराः** - ''संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ।। ''

अर्थात् सूत्रस्य षट् प्रकाराः सन्ति । -

(१) **संज्ञासूत्रम्** – ''संज्ञासंज्ञिप्रत्यायकं सूत्रं संज्ञासूत्रम्'' । यथा वृद्धिरादैच् (पा. १-१.१)।

अर्थात् संज्ञां संज्ञिनञ्च यत् बोधयति तदेव संज्ञासूत्रम्। यथा वृद्धिरादैच् (पा-१,१.१) इति सूत्रे वृद्धिपदबोध्यानां आ-ऐ-औ इत्येतेषां परिज्ञानं भवति।

(२) **परिभाषासूत्रम् -** ''अनियमे नियमकारिणी परिभाषा''। अर्थात् नियमरहितस्थानेषु व्यवस्थाकरणं परिभाषासूत्रस्य कार्यं वर्तते। यथा -''तस्मिन्निति निर्दिष्टे पूर्वस्य (पा १,१.६६) इत्यस्मिन् सूत्रे पदस्य सप्तमीविभक्तिप्रयोग: अव्यवहित-पूर्वे विदधाति इति ज्ञायते।

(३) **विधिसूत्रम् -** ''आदेशादिविधायकं सूत्रं विधिसूत्रम्''। अर्थात् आदेशादीनां विधानं यत्सूत्रं करोति तद् विधिसूत्रम्। यथा ''इको यणचि'' (पा. १, १.७७) इति सूत्रेण (इक्) इक: (इ- उ-ऋ -लृ) स्थाने यण् (य-व-र-ल) एतेषामादेशानां विधानं वर्तते। अस्मिन् विषये एकोक्ति: प्रसिद्धा- ''मित्रवदागम: शत्रुवदादेश:'' इति। अर्थात् आगम: मित्रवत् वर्तते, स आगम: पूर्ववर्तिनं पदं वा परवर्तिनं पदं न दूरीकृत्य स्वकार्यं करोति। एवं आदेश: पूर्ववर्तिनं परवर्तिनं वा पदं दूरीकृत्य तत्स्थाने एव स्थित्वा कार्यं करोति।

(४) **नियमसूत्रम् -** ''प्राप्तस्य विधे: नियामकं सूत्रं नियमसूत्रम्''। अर्थात् प्राप्तविधिविषये नियमकरणं नियमसूत्रस्य लक्षणमस्ति। यथा '' कृत्तद्धितसमासाश्च'' (पा १, २.४६), अनेन सूत्रेण कृदन्त-तद्धितान्तानां समासशब्दानां प्रातिपदिकसंज्ञा भवति। यथा समाससंज्ञक: राजन्+अस्+ पुरुष+सु इत्यादि स्थाने अर्थवदधातुरप्रत्यय:प्रातिपदिकम् (पा. १, २.४५) इत्यनेन सूत्रेण प्रातिपदिकसंज्ञा भवेत्, अत: समासग्रहणं व्यर्थं भवेत्। अतो नियम: क्रियते यत्- यस्मिन् शब्दसमूहे पूर्वभागे पदं स्यात्, तस्य पदस्य यदि प्रातिपदिकसंज्ञा भवेत् तर्हि समासे एव भवेत्। अत: 'राजन्' इति पदस्य प्रातिपदिकसंज्ञां वर्जयित्वा 'पुरुष' इति परपदस्य प्रातिपदिकसंज्ञा समासे नियम्यते। अनेन नियमेन वाक्यादीनां प्रातिपदिकसंज्ञा न भवति।

(५) **अतिदेशसूत्रम् -** ''अतस्मिन् तद्धर्मापादकं सूत्रमतिदेशसूत्रम्''। अतिदेशशास्त्रं वस्तुत : आरोपबोधकं वर्तते। यदि वस्तुसत्ता न स्यात् तथापि तस्या: (वस्तुसत्ताया:) धर्मस्यारोप: स्यात्, तदा अतिदेशः कथ्यते। यथा लोके गुरोरभावे गुरुपुत्रं प्रति गुरो: समानादरस्य भावना क्रियते, तथैव लोटो लङ्वत् (पा. ३, ४.८५) इत्यत्र व्याकरणशास्त्रे लोट्लकारःलङ्लकारवत् मन्येत। यस्य फलस्वरूपेण लोट्-आज्ञार्थेऽपि वस् - मस् -इत्यत्र सकारलोपो भवति।

**(६)अधिकारसूत्रम् -** ''उत्तरोत्तरसूत्रेषु स्वघटकपदसमर्थकसूत्रमधिकारसूत्रम्''। आगामिषु सूत्रेषु स्वप्रभावस्थापकत्वमधिकारसूत्रत्वम्। यथा- ''कारके (पा. १, ३.२३) इत्यस्य सूत्रस्य क्रियाया: कर्त्रा क्रियायामन्वितेन सह यो विधि: स समानतया यत्र वर्तते स अधिकार: कर्मादौ अधिक्रियते। कर्ता कर्म करणं इत्यादिनां कारकसंज्ञात्वं प्रसिध्धम्। पाणिनीयशब्दानुशासनस्य पाठान्तरमतान्तरसहितं लधुपाठबृहत्पाठाविति पाठद्वयं वर्तते। पाणिनीयशास्त्रस्य नामचतुष्टयमुपलभ्यते यथा- (१) अष्टकम् (२) अष्टाध्यायी (३) शब्दानुशासनम् (४) वृत्तिसूत्रं च। पाणिनिरचितो ग्रन्थ: अष्टस्वध्यायेषु विभक्तो वर्तते। अत: अष्टकं, अष्टाध्यायी चेति अभिधानद्वयं वर्तते।

शब्दानुशासनमित्यभिधानं पातञ्जलमहाभाष्यस्यारंम्भे (३६) दृश्यते। तत्र लिखितं वर्तते यत् -'अथेति शब्दो अधिकारार्थ: प्रयुज्यते। शब्दानुशासनं नाम ''शब्दमधिकृतं वेदितव्यमि'ति।

'वृत्तिसूत्र' मित्यत्र पाणिनीयसूत्रपाठार्थं वृत्तिसूत्रशब्दस्य प्रयोग: महाभाष्ये द्विवारमुपलभ्यते। (३७) श्रीमता नागेशेनापि महाभाष्यप्रदीपविवरणे लिखितं (३८) यत्- पाणिनीयसूत्राणां वृतिसद्भावात् वार्तिकानां तदभावाच्च तयोर्वैषम्य-बोधनायेदम् '' इति (२-१-.१)। अर्थात् पाणिनीयसूत्राणां वृत्तय: सन्ति, न तु वार्तिकानाम्। अत: द्वयोर्मध्ये भेदप्रदर्शनार्थं पाणिनीयसूत्राणां कृते ''वृत्तिसूत्रमि'ति पदस्य प्रयोग कृत:।

आचार्येण चन्द्रगोमिना स्वोपज्ञवृतौ उदाहरणं प्रदत्तं यथा- ''पाणिनोपज्ञमकालकं व्याकरणम्'' (३९) इति। एवं काशिकायां, (४०) सरस्वतीकण्ठाभरणे (४१) च वामनीय लिङ्गानुशासनेऽपि (४२) वृत्तिषु पाणिन्युपज्ञकालकं व्याकरणम् '' इति पाठ: वर्तते। द्वयोः भावस्तु ईदृशो भाति यत् - कालविषयक - परिभाषारहितं व्याकरणं सर्वप्रथमं पाणिनिनैव रचितम्। प्राचीन-व्याकरणेषु भूत-भविष्यद् -अनद्यतन - आदि विविधकालपरिभाषाः आसन्। पाणिनिना तु तासां लोक-प्रसिद्धत्वात् स्वल्पाक्षरत्व-साधनार्थमेव ताः परिभाषाः न स्वीकृताः। भगवता पाणिनिनाऽष्टाध्यायी सूत्रप्रकारमवलम्ब्य कृता वर्तते। ''सूचनात् सूत्र'' मिति सूत्रशब्दस्य व्युत्पत्तिमनेके प्रदर्शयन्ति। अर्थात् सङ्केतकर्तृत्वं यत् संक्षिप्तं वचनं तदेव सूत्रम्।

शब्दानुशासनस्य समग्राङ्गतासिद्ध्यर्थं धातुपाठः, गणपाठः, उणादिसूत्राणि, लिङ्गानुशासनमिति चत्वारो ग्रन्थाः भगवता पाणिनिना परिशिष्टरूपेण रचिताः प्राप्यन्ते।

भगवत: पाणिनेर्व्याकरणं ख्रिष्टाब्दात्प्राक् सप्तमशतकादारभ्य पञ्चमशतककाले रचितं

स्वीक्रियते । तत्राऽष्टौ अध्यायाः सन्ति । **प्रथमाध्याये** संज्ञा, परिभाषा, परस्मैपदात्मनेपदप्रयोग निरूपणम्, कारकाणां निरूपणं अर्थात् विभक्त्यर्थनिरूपणम् सन्ति । **द्वितीयाध्याये** समासनियमा:, **तृतीयाध्याये** धातुप्रत्ययानां, कृदन्तधातुसाधितप्रत्ययानां च विस्तृतं प्रतिपादनं वर्तते । **चतुर्थाध्याये** एवं **पञ्चमाध्याये** पुंल्लिङ्गशब्दानां स्त्रीत्वकरणोपयोगिन: प्रत्यया: (स्त्रीप्रत्यया:), तद्धितप्रत्यया:, नामसाधितविभक्ते: प्रत्यया:, ततश्च समासान्तप्रत्ययानां प्रकरणम् । **षष्ठाध्याये** धातूनां द्विर्भावे (अभ्यासे कृते) सन्धिस्वरसमासानां परिवर्तननियमा:, अलुक् एवं अङ्गपदस्य मूलस्वरूपं , प्रत्ययेन सह अङ्गस्य य: परिणामो भवति तत्सर्वं चतुर्थपादादारभ्य सप्तमाध्यायपर्यन्तं विषयरूपेण प्रतिपादितम् । **अष्टमाध्याये** णत्व-षत्व प्रकरणे तन्नियमा:, अपरे च वर्णविकार -विषयकाणि सूत्राणि सन्ति । एवञ्च धातुपाठ:, गणपाठ: , उणादिसूत्राणि एतत्सर्वं मिलित्वा अष्टाध्यायी सम्पूर्णव्याकरणस्य प्रतिपादकरूपेण निरूपिता वर्तते ।

केचन कथयन्ति यत् 'अ इ उ ण्', 'ऋ लृ क्' एत्यादि चतुर्दशसूत्राणि न पाणिनिविरचितानि- ''इति माहेश्वराणिसूत्राणि'' इत्युल्लेखत्वात् । महेश्वरसकाशादागतानि न तु पाणिनिना एतानि चतुर्दशसूत्राणि विरचितानि । किन्त्वेतद् न समीचीनम् एतानि चतुर्दशसूत्राणि भगवत: महेश्वरस्य कृपया पाणिनिना प्राप्तानि इत्यर्थो निष्पद्यते, न तु महेश्वरविरचितानि इति । (४३)

अत: पाणिनीयानि एव एतानि चतुर्दशसूत्राणि सन्ति । एतामष्टाध्याय्यामवलम्ब्य यत्र यत्र आवश्यकता, तत्र तत्र भगवता कात्यायनेन सूत्रेषु पदानां वृद्धिक्षयशोधनानि कृतानि । एतत्सर्वं उक्तानुक्तदुरुक्तचिंतारूपं शास्त्रं वार्तिकमिति ज्ञायते । (४४)

यत्र सूत्रे कथितपदस्य अनावश्यकतायां भगवता पाणिनिना पदमुच्चरितं स्यात् तत्रोक्तचिन्ता । यत्र कस्यचित्पदस्य आवश्यकतायां पदं नोच्चरितं स्यात् तत्र अनुक्तचिंता । यत्र वा कस्यचित्पदस्य दुरुक्तत्वाद् अनावश्यकतायां परिवर्तनं कृतं स्यात् तत्र दुरुक्तचिंता । एतेषां वार्तिकानां समावेशः काशिका-सिध्धान्तकौमुद्यादिषु ग्रन्थेषु अस्ति । तत्पश्चात् भगवता पतञ्जलिना अष्टाध्यायी-सूत्राण्यवलम्ब्य महाभाष्यं रचितम् । तस्य समय: ख्रिस्ताब्दात् प्राक् १५० निश्चित: अस्ति । इदं महाभाष्यमतीव शुद्धं प्रामाणिकं बृहत्कायं च वर्तते । पतञ्जलि: पाणिनिं सश्रद्धं निर्दिशति यत् - ''महती सूक्ष्मेक्षिका भगवत: पाणिने: ।(४५) एवञ्च ''व्याख्यानतो विशेष प्रतिपत्तिर्न हि संदेहादलक्षणम् '' (परिभाषा-१) (४६)

अनया रीत्या पाणिनिरचितान्यष्टाध्यायीसूत्राणि, कात्यायनवार्तिकानि, पतञ्जलिमहाभाष्यं च इत्येतद् सम्पूर्णं व्याकरणं त्रिमुनिव्याकरणत्वेन वैयाकरणेषु प्रथितं वर्तते । तत्कालादारभ्य अद्यावधि अस्य त्रिमुनिव्याकरणस्यैव माहात्म्यं, प्रमाणभूतत्वं च विद्वत्समाजे अप्रतिहतं स्वीक्रियते ।

व्याकरणस्यास्य परम्पराद्वयं प्रवर्तते-प्रथमा सूत्रक्रमपद्धति:- यया पद्धत्या भगवता पतञ्जलिना महाभाष्यं रचितं, वामनजयादित्येन च काशिका विरचिता। द्वितीया च प्रक्रियाक्रमपद्धति:- यत्र रामचन्द्रस्य प्रक्रियाकौमुद्या:, भट्टोजिदीक्षितस्य वैयाकरणसिध्धान्तकौमुद्याश्च अन्तर्भाव: क्रियते। विद्यार्थिनां कृते इयं वैयाकरणसिद्धान्तकौमुदी संस्कृतव्याकरणस्य प्रारम्भिकाभ्यासार्थे अतीवोपयुक्ता। अतोऽन्यानि व्याकरणानि तस्याग्रे नगण्याण्येव सञ्जातानि। प्रक्रियाकौमुदीकारा: रामचन्द्रमहाभागाः पञ्चदशशताब्द्या: पूर्वार्धे निश्चिता:, भट्टोजिदीक्षितचरणास्तु जगन्नाथस्य समकालीना:, यतस्तयो: समय: सप्तदशशताब्द्या: पूर्वार्ध: (ख्रिस्ताब्दस्य १६३०) स्वीक्रियते।

सारस्वतव्याकरणस्य सूत्राणां प्रक्रियाकर्ता श्रीअनुभूतिस्वरूपाचार्योऽपि पृथक् पृथक् स्थानेषु रामचन्द्रस्य प्रक्रियाकौमुदीं प्रमाणतया स्वीकरोति।

श्रीनरेन्द्राचार्यस्य सारस्वतव्याकरणमाधारग्रन्थरूपेण गृहीत्वा भोजव्याकरणं रचितं वर्तते। अत: तल्लक्षीकृत्य किञ्चिद्विस्तृतं वर्ण्यते, -

पाणिनीयव्याकरणस्याध्ययनेनेदमवश्यं स्पष्टीभवति यत् तस्य व्याकरणस्य शास्त्रीयप्रतिपादनानुसारेण सूत्रपद्धत्यनुसारेण चेदं पाणिनीयव्याकरणं प्रकरणक्रमानुसारं वर्तते। किन्तु परवर्तिनं कातन्त्रव्याकरणं, सिद्धहैमशब्दानुशासनम्, सारस्वतव्याकरणं चैतानि प्रक्रियाक्रमानुसाराणि वर्तन्ते। अत एव पाणिनीयव्याकरणे यादृश: प्रत्ययस्याधिकार: 'प्रत्यय:' (३, १.१) 'परश्च'(३, १.२.) इति तृतीयाध्यायस्य प्रथमपादस्य प्रथमसूत्रादारभ्य आपञ्चमाध्यायपर्यन्तं प्रवर्तते, (४७) तादृशी अधिकारपद्धति: एतेषु त्रिषु व्याकरणेषु प्राय: न दृश्यते। गुणवद्धीसदृशा पदानुवृति: एतेषां व्याकरणत्रयाणां सर्वासु प्रक्रियासु प्राय: पृथग्रूपेण दृश्यते। (४८)

श्री एस.के.बेलवलकरमहोदया: स्वनिर्मिते ग्रन्थे (४९) बोधयन्ति यद् अस्मिन् सारस्वतव्याकरणे ५९७ सूत्राणि, एवं ९१ वार्तिकानि सन्ति। सर्वं मिलित्वा ६८८ सूत्राणि वर्तन्ते। भोजव्याकरणस्य गुर्जरभाषानुवादसहितप्रकाशितायां वृत्तौ विनयसागरस्य विद्वच्चिन्तामणिग्रन्थे ५६० सूत्राण्येव सन्ति - इति स्पष्टतया निर्दिष्टं वर्तते। यद्यपि प्रक्रियानुसारेण कतिपयानि सूत्राणि एवं वार्तिकानि द्विर्वारं वा तदधिकं पुनरावृत्य १४०० सूत्रसंख्या प्रकाशिताऽस्ति। (५०)

महोपाध्याय -श्रीविनयसागरमहोदयानां मतेन सारस्वतसूत्राणां क्रमविषय: एवं वर्तते -

| | | | | |
|---|---|---|---|---|
| प्रथमा वृति : | संज्ञासूत्राणि | - | ००७ | |
| | स्वरसन्धिसूत्राणि | - | ०१९ | |
| | प्रकृतिभावसूत्राणि | - | ००४ | |
| | व्यञ्जनसन्धिसूत्राणि | - | ०१८ | |
| | विसर्गसन्धिसूत्राणि | - | ०१० | |
| | विभक्तिसूत्राणि | - | १०३ | |
| | युष्मदस्मदीसूत्राणि | - | ०७६ | |
| | कारकसूत्राणि | - | ००८ | |
| | तद्धितसूत्राणि | - | ०३३ | |
| | स्त्रीप्रत्ययसूत्राणि | - | ०११ | |
| | समाससूत्राणि | - | ०२१ | |
| द्वितियावृति :- | आरव्यातसूत्राणि | - | १५६ | |
| तृतीयावृति :- | कृदन्तसूत्राणि | - | ०८४ | |
| | सर्वं संमील्य | - | ५६० | सूत्राणि सन्ति। |
| | | | ०७८ | |

| | | | | | |
|---|---|---|---|---|---|
| इ | यं | स्वरे | १, | २. | १. |
| उ | वम् | '' | १, | २. | २. |
| ऋ | रम् | '' | १, | २. | ३. |
| ऌ | लम् | '' | १, | २. | ४ |
| ए | अय् | '' | १, | २. | ५ |
| अ | इ | ए | १, | २. | १३ |
| '' | उ | ओ | १, | २. | १४ |
| '' | ऋ | अर् | १, | २. | १५ |
| '' | ऌ | अल् | १, | २. | १६ |

इत्यादय: सन्ति।

एवञ्च पाणिनेः, कातन्त्रस्य, सिद्धहैमव्याकरणस्य च दीर्घसूत्राणामल्पत्वं कर्तुं तत्तद्धातु-इत्यादीनां गणान् रचयित्वा स्थापिताः। यथा पाणिनेः '' इषुगमियमां छः'' (७,३,७७.) , कातन्त्रस्य ''गमियमां छः'' (३. ६. ६९) एवं सिध्धहैमस्य ''गमिषद्यमश्छः'' (४,२. १०६) एतेषां कृते ''गमां छः'' (२. १. १०६) रचयित्वा स्थापितम्। तद्वदेव पाणिनिसूत्रं ''गुप्तिज्किद्भ्यः सन्'' (३. १. ५), कातन्त्रस्य ''गुप्तिज्किद्भ्यः'' (३. २. २.) एवं सिद्धहैमसूत्रं ''गुप्तिजो गर्हाक्षान्तौ सन् (३, ४, ५) एवं '' कितः संशयप्रतीकारे (३. ४. ६) च ''गुब्भ्यः'' (२.१.१४१) इत्येव कृतमस्ति।

पाणिनिसूत्रं ''अचिश्नुधातुभ्रुवां य्वोरियङुवङौ '' (६.४.७७), कातन्त्रसूत्रं ईदूतोरियूवौ'' (२. २. ५६), सिद्धहैमसूत्रं '' धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये'' (२. १. ६०) इति कृतं वर्तते।

छन्दो-वेदविषयकानि सूत्राणि दूरीकृतानि वर्तन्ते। अनेन प्रकारेण ईदृशं सारल्यं, संक्षेपः एवं शीघ्रफलदायित्वं एभिः कारणैः अस्य व्याकरणस्य प्रचारः भारतस्योत्तरभागप्रदेशेषु अतीव अभवत्। यवननृपाणां कृतेऽपि भारतीय भाषायाः अध्ययनकरणे न कापि विपत्तिः सञ्जाता।

नरेन्द्राचार्यस्य सारस्वतसूत्राणामुपरि, अनुभूतिस्वरूपाचार्यस्य प्रक्रियोपरि चन्द्रकीर्तिमुनेः सुबोधिका नाम्नि टीका वर्तते, तत्र अनेकेषु स्थानेषु (पृष्ठ क्रमांक - १५९ - १७५ - १९२ - २१६ - इत्यादि) सारस्वतप्रक्रियायाः पद्यानि अनूभूतिस्वरूपाचार्येण प्रकियाकौमुद्याः गृहीतानि इति निर्देशो विद्यते। एवं नैकेषु स्थानेषु च (पृष्ठ क्रमांक - १६ - ४१ - ४८ - २७९ - ३०६ - इत्यादि) कस्य पदस्य अनुवृत्तिः प्रस्तुतस्थानस्य सूत्रे गृहीतव्या इति निर्देशः कृतो वर्तते। चन्द्रकीर्तिमुनिना सारस्वतप्रक्रियायां प्रक्रिया न दत्ता। ईदृशानां पदानां प्रक्रियाः तथा च साधनाः न प्रदत्ताः स्युः, ईदृशानां धातूनां साधनाः वा रूपाणि प्रदाय विषयं पूर्णकरणार्थं पद्धतिः स्वीकृता वर्तते।

तस्य ग्रन्थेषु संवत् १७०२ (ख्रिस्ताब्देः १६५६) तमे वर्षे रचित ''अनेकार्थरत्नकोशः'' अथवा ''अनेकार्थनाममाला'' वर्तते। ग्रन्थेऽस्मिन् हिन्दीभाषायाः शब्दानां कोशः वर्तते, एवञ्च सः ग्रन्थः त्रिष्वधिकारेषु विभक्तः कृतः। सर्वं मिलित्वा १६९ श्लोकाः सन्ति।

''हिंगुलप्रकरः'' नाम ग्रन्थः सं. १७०० (ख्रिस्ताब्दः १६५४) तमवर्षपूर्वं रचितः। हिंगुलः अर्थात् हिंगु। तस्य पदार्थस्य खाद्योपयोगिकरणे काचित् साधना क्रियते। अत्र तु तात्विका-ध्यात्मिका साधना दर्शने हिंगुलः। अनेन प्रकारेण पाणिनेः व्याकरणस्य माहेश्वराणि सूत्राणि न गृहीत्वा प्रातिशाख्यानां स्वराः, कु-इत्यादीनि व्यञ्जनानि प्रगृहीतानि सन्ति।

'कलिकालसर्वज्ञ'-नाम्ना प्रसिद्धस्य हेमचन्द्राचार्यस्य परिचयं दातुं अत्रानावश्यकता। तस्य

सिद्धहैमशब्दानुशासने अष्टावध्यायाः सन्ति । तत्र प्रथममध्यायमारभ्य सप्तस्वध्यायेषु संस्कृतभाषाव्याकरण विषयकाणि सूत्राणि सन्ति, एवञ्च अष्टमाध्याये संस्कृतभाषायाः शब्देषु, प्रत्ययेषु च कानि कानि परिवर्तनानि भूत्वा प्राकृत शौरसेनी-मागधी -पैशाची-चूलिकापैशाचि एवं अपभ्रंशः एतासां षण्णां भाषाणां शब्दाः निष्पन्नाः इत्येषां तेषां विवरणं सूत्रेषु वर्तते । भाषाशास्त्रदृष्ट्या अयमध्यायः अतिमहत्वं भजते ।

तस्य संज्ञासूत्राणि कातन्त्रव्याकरणस्य सरलप्रयोगानेव स्वीकुर्वन्ति । यथा- लृदन्ताः समानाः (१, १. ७), अनवर्णा नामी (१, १. ६), ए ऐ ओ औ सन्ध्यक्षरम् (१. १. ८) , अघोषः (१, १. १३), घोषः (१, १. १४) , य र ल वा अन्तःस्थाः (१, १. १५) एवञ्च कालादिसंज्ञाः यथा आशीः (३, ३. १३) अद्यतनी (५, २. ४) , अनद्यतने ह्यस्तनी (५, २. १) इत्यादि लोकप्रचलितेषु अर्थेष्वेव स्वीकुर्वन्ति ।

स्वरसन्धौ समानानां स्वेन दीर्घः (१, २. १.) अवर्णस्येवर्णादीनां एद् ओद् अर् अल् (१, २. ६) , एदैतोऽयाय् (१, २. २३) , ओदौतोऽवाव् (१, २. २४) इत्यादिषु पाणिनीयव्याकरणस्य अकः सवर्णे दीर्घः (६, १. १०१) , इको यणचि (६, १. ७७) एवं एचोऽयवायावः (६, १.७८) एतेषां सूत्राणां व्याख्यानान्तराणि रूपाण्येव सन्ति ।

विकरणप्रत्ययाः दिवादेः श्यः (३, ४. ७२) स्वादेः श्नुः (३, ४. ७५) तुदादेः शः (३, ४. ४१) एवं चुरादिभ्यो णिच् (३, ४. १७) पाणिनेः प्रत्ययान् स्वीकरोति । अपोऽद्भे (२, १. ४) , उपसर्गाद् दः किः (५, ३. ८७), गमिषद्यमच्छः (४, २. १०६) अत्रापि अल्पं परिवर्तनं कृत्वा प्रत्ययाः स्वीकृताः ।

नरेन्द्राचार्यस्य व्याकरणे वैज्ञानिक रीतिं एवं तस्य पद्धतिपुरःसरं रचनादर्शनेन तद्व्याकरणं प्रकरणक्रमानुसारं वर्तते । यत्तु उपरिनिर्दिष्टं कातन्त्रव्याकरणं, सिद्धहैमशब्दानुशासनं, एवं च प्रस्तुतं सारस्वतव्याकरणं प्रक्रियाक्रमलक्षी वर्तन्ते । अत एव यथा यद् पाणिनिव्याकरणे प्रत्ययाधिकारः तृतीयाध्यायस्य प्रथमपादस्य प्रथमसूत्रादारभ्य पञ्चमाध्यायस्य अन्तपर्यन्तं प्रवर्तते तदेतेषु त्रिषु व्याकरणेषु न दृश्यते । गुणवृद्धि सदृशाणि सर्वप्रक्रियाव्यापि अनुवृत्तपदान्यपि अत्र प्रत्येकप्रक्रियायां पृथक् दृश्यन्ते ।

# (इ) पाणिनीयपरम्परा।

यद्यपि नैके वार्तिकपाठाः रचिताः इति महाभाष्यस्य अध्ययनेन ज्ञायते, तद्यथा (१) कात्यस्य कात्यायनस्य वा (२) भारद्वाजस्य (३) सुनागस्य (४) क्रोष्टुः (५) वाडवस्य तथा च महाभाष्य टीकासु (६) व्याघ्रभूतेः (७) वैयाघ्रपद्यस्य च। तथापि कात्यायनस्य वररुचेः वार्तिकपाठः महाभाष्ये सर्वसम्मतरूपेण स्वीकृतत्वात् कात्यायनस्य अत्यल्पः परिचयः प्रस्तूयतेऽत्र।

**कात्यायन** : - पाणिनीयव्याकरणोपरि भगवतःकात्यायनस्य वार्तिकपाठः प्रसिद्धः। महाभाष्येऽपि मुख्यरूपेण भगवतःकात्यायनस्य वार्तिकानां व्याख्यानानि वर्तन्ते। अतः भगवता पतञ्जलिना स्वमहाभाष्ये (३, २. ११८) कात्यायनः स्पष्टरूपेण वार्तिककारः इति कथितम्।

अस्य कात्यायनस्य कात्यः, कात्यायनः, पुनर्वसुः, मेधाजित्, वररुचिः इति नामान्तराणि प्राप्यन्ते। महाभाष्यस्य पश्पशाह्निके ''प्रियतद्धिताः दाक्षिणात्याः''इति प्रमाणद्वारा ज्ञायते यत् कात्यायनो दाक्षिणात्यः। भगवता पतञ्जलिना कात्यायनस्य कृते ''भगवान्'' इति शब्दप्रयोगः कृतः।(५२) विदुषां मतेन कात्यायनस्य समयः वैक्रमात् प्रायः २७० वर्षाणि पूर्वमासीत्।

भगवतः कात्यायनस्य वार्तिकपाठः पाणिनीयव्याकरणस्य अतीव महत्वपूर्णमङ्गं वर्तते। तेन विना पाणिनीयव्याकरणमपूर्णमेव प्रतिभाति। भगवता पतञ्जलिना कात्यायनीयं वार्तिकोपरि व्याख्या कृता वर्तते। कात्यायनस्य वार्तिकपाठःस्वतन्त्ररूपेण नोपलभ्यते। महाभाष्यद्वारा वार्तिकानां निश्चितगणना (सङ्ख्या) न प्रतीयते। किन्तु चौखम्बा संस्कृत सिरिज इत्यत्र श्रीहरिदास संस्कृतग्रन्थमालायाः एकादशे पं.श्रीगोपालशास्त्रि नेने सम्पादितायां श्रीमद्भट्टोजिदीक्षीत प्रणितायां वैयाकरणसिध्धान्तकौमुद्यां (चौखम्बा - वाराणसी, ख्रिस्ताब्दः १९६४) वैदिक प्रक्रियायाः स्वरसञ्चारप्रकारप्रकरणस्य ३९७३ कुत्सने च सुप्यगोत्रादाविति (८, १-६९) पाणिनीय सूत्र व्याख्यायां अन्तिमं वार्तिकं ८३६ तमं वर्तते। तेनेदं निश्चीयते यत् पाणिनीयपरम्परायां ८३६ मितानि वार्तिकानि स्वीकृतानि व्यारव्यातानि च। (?)

वार्तिकलक्षणं तु प्रसिद्धमेव - तथापि

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।<br>
तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञाः मनीषिणः॥

इति दिशानुसारं समासप्रत्ययविधौ प्रतिषेधः (२) इति उक्तचिन्तायाः उदाहरणम्। ऋलवर्णयोर्मिथः सावर्ण्यं वाच्यम् (१) इति अनुक्तचिन्तायाः उदाहरणम्, ततश्च यणः प्रतिषेधो वाच्यः (४) इति दुरुक्तचिन्तायाः उदाहरणम् इत्यलमतिविस्तरेण।

पाणिनीयपरम्परायां अधोनिर्दिष्टाः ग्रन्थाः भगवता कात्यायनेन प्रणीताः। (५३) यथा

(१) स्वर्गारोहणम् नाम काव्यम्। (३) स्मृतिः।

(२) भ्राजसंज्ञकश्लोकाः (४) उभयसारिका - भाण

श्री आफ्रेक्टबेवर महोदयेन सम्पादिते हस्तप्रतसूचीपत्रे कात्यायनवररुचेः नाम्ना नैके ग्रन्थाः विरचिताः दृश्यन्ते।

**महाभाष्यकारः पतञ्जलिः** - महामुनिना पतञ्जलिना पाणिनीयव्याकरणोपरि महती व्याख्या लिखिता। इयं व्याख्या संस्कृतवाङ्मये महाभाष्यनाम्ना प्रसिद्धा। अस्मिन् ग्रन्थे भगवता पतञ्जलिना व्याकरणसदृशं दुरूहं एवं शुष्कं विषयं सरसेन च रूपेण हृदयङ्गमं कृतमिति तत्पठनेनैव ज्ञायते। ग्रन्थस्यास्य भाषाशैली सरला एवं प्राञ्जला। यदि कोऽपि विद्वान् तं ग्रन्थं पठति तदा तस्य ग्रन्थस्य रचनासौष्ठवस्य मुक्तकण्ठेन प्रशंसां कर्तुमारभते। वस्तुतस्तु अयं ग्रन्थः न केवलं व्याकरणसम्प्रदाये, किन्तु सकलसंस्कृतवाङ्मयस्यैको अनुपमो ग्रन्थः वर्तते। महाभाष्यं पाणिनीयव्याकरणस्य सर्वमान्यः प्रामाणिकः ग्रन्थः अस्ति।

अस्य ग्रन्थस्य कर्ता भगवान्पतञ्जलिःगोनर्दीयः, गोणिकापुत्र, नागनाथः, अहिपतिः, फणिभृत्, चूर्णिकारः पदकारः इत्यादि नैकैः अभिधानैः स्मर्यते। भगवतापतञ्जलिना महाभाष्ये स्वपरिचयो न प्रदत्तः, अतस्तस्य इतिवृत्तं अन्धकारावृतं वर्तते। किन्तु महाभाष्यस्य विविधैः निर्देशैर्ज्ञायते यदयं पतञ्जलिः मथुरा, साकेत, कौशाम्बी, पाटलीपुत्रमित्यादि प्रदेशेषु विज्ञः आसीत्।

अस्य महाभाष्यस्य रचना पञ्चाशीत्याह्निकेषु कृता वर्तते। भगवतः पाणिनेरष्टाध्याय्याः अष्टौ अध्यायाः सन्ति। प्रत्येकस्मिन्नध्याये पादचतुष्टयमस्ति। तत्र प्रत्यकपादे आह्निकानि (विभागाः) नव सन्ति।

अतः तत् नवाह्निकमहाभाष्यमिति नाम्ना प्रसिध्धम्। मेधावी गुरुर्योग्यं शिष्यमेकस्मिन् दिने यत् पाठयति तद् आह्निकमिति कथ्यते।

## महाभाष्य प्राप्त (८५) पञ्चाशीत्याह्निक दर्शकं कोष्टकम् :-

| अध्यायः | पादः (सूत्राणि) | आह्निकानि। |
|---|---|---|
| प्रथमः | प्रथमः (७५) | ०९ |
| प्रथमः | द्वितीय : (७३) | ०३ |
| प्रथमः | तृतीयः (९३) | ०२ |
| प्रथमः | चतुर्थः (११०) | ०४ |
| | | १८ |
| द्वितीयः | प्रथमः (७२) | ०३ |
| द्वितीयः | द्वितीय : (३८) | ०२ |
| द्वितीयः | तृतीयः (७१) | ०३ |
| द्वितीयः | चतुर्थः (८५) | ०२ |
| | | १० |
| तृतीयः | प्रथमः (१४९) | ०६ |
| तृतीयः | द्वितीय : (१८८) | ०३ |
| तृतीयः | तृतीयः (१६७) | ०२ |
| तृतीयः | चतुर्थः (११४) | ०१ |
| | | १२ |
| चतुर्थः | प्रथमः (१७६) | ०४ |
| चतुर्थः | द्वितीय : (१४५) | ०२ |
| चतुर्थः | तृतीयः (१६८) | ०२ |
| चतुर्थः | चतुर्थः (१४४) | ०१ |
| | | ०९ |
| पञ्चमः | प्रथमः (१३६) | ०२ |
| पञ्चमः | द्वितीय : (१४०) | ०२ |
| पञ्चमः | तृतीयः (११९) | ०२ |
| पञ्चमः | चतुर्थः (१६०) | ०१ |
| | | ०७ |

| अध्यायः | पादः (सूत्राणि) | आह्निकानि। |
|---|---|---|
| षष्ठः | प्रथमः (२२३) | ०६ |
| षष्ठः | द्वितीयः (१९९) | ०२ |
| षष्ठः | तृतीयः (१३९) | ०३ |
| षष्ठः | चतुर्थः (१७४) | ०४ |
| | | **१५** |
| सप्तमः | प्रथमः (१०२) | ०२ |
| सप्तमः | द्वितीयः (११७) | ०२ |
| सप्तमः | तृतीयः (१२०) | ०२ |
| सप्तमः | चतुर्थः (०९३) | ०१ |
| | | **०७** |
| अष्टमः | प्रथमः (०७४) | ०२ |
| अष्टमः | द्वितीयः (१०८) | ०२ |
| अष्टमः | तृतीयः (११८) | ०२ |
| अष्टमः | चतुर्थः (०६८) | ०१ |
| | | **०७** |
| | **मिलित्वा** | ८५ |

अस्य व्याकरणमहाभाष्यस्य लेखनशैली, रचनाशैली च संस्कृतवाङ्मये अनुपमे वर्तेते । न कोऽपि ग्रन्थः अनेन महाभाष्येण सह तुलनां कर्तुं समर्थः ।अस्य महाभाष्यस्य भाषासारल्यं, प्राञ्जलता, स्वाभाविकता एवं विषयप्रतिपादनशैली उत्कृष्टतया प्रकाशन्ते, अतोऽयं ग्रन्थः समस्त संस्कृत वाङ्मये आदर्शभूतः वर्तते ।

**वामनजयादित्यौ** :– श्रीजयादित्येन एवं वामनेन सम्मिल्य विरचिता वृत्तिः काशिकाः नाम्ना प्रसिद्धा । पाणिनीयव्याकरणग्रन्थेषु महाभाष्यं, एवं भर्तृहरिविरचित ग्रन्थेभ्यः अनन्तरा इयं वृत्तिः सर्वासु वृत्तिसु प्राचीना एवं महत्वपूर्णा वर्तते । तस्यां वृत्तौ अनेकसूत्राणां वृत्तयः एवं उदाहरणानि प्राचीनवृत्तिभ्यः संगृहीतानि वर्तन्ते । काशिकायां नैकेषु स्थानेषु महाभाष्यस्य अनुसरणं न कृतं, अनेन कारणेन काशिकायाः गौरवं क्षीणं न भवति, कारणं तु ईदृशेषु स्थानेषु ग्रन्थकारेण प्रायः प्राचीन वृत्तीनामनुसरणं

कृतं वर्तते । काशिकायाः अतिप्राचीना व्याख्या जिनेन्द्रबुद्धि विरचिता, 'काशिकाविवरणपञ्जिका' वर्तते । वैयाकरणनिकाये इयं 'न्यासः' नाम्ना प्रसिद्धा । इयं व्याख्या जयादित्यवामनयोः वृत्तौ वर्तते । काशिकावृत्तिः व्याकरणशास्त्रस्य अतीव महत्वपूर्णः ग्रन्थः वर्तते। तत्र निम्नोल्लिखितं वैशिष्ट्यं वर्तते, यथा-

(१) प्राक्काशिकावृत्तिग्रन्थेषु गणपाठः नास्ति, किन्तु काशिकायां गणपाठस्य यथास्थानं सन्निवेशो वर्तते ।

(२) अष्टाध्याय्या : विलुप्तानां प्राचीन वृत्तीनामेवं ग्रन्थर्कर्तृणां नैकानि मतानि ग्रन्थेऽस्मिन् उद्धृतानि वर्तन्ते, यस्योल्लेखाः अन्यत्र न प्राप्यन्ते ।

(३) अस्यां वृत्तौ नैकसूत्राणां व्याख्या प्राचीनवृत्त्यनुसारेण रचिता ।

(४) काशिकावृत्तान्तर्गतान्युदाहरणानि, प्रत्युदाहरणानि च प्रायः प्राचीनवृत्त्यनुसारेण सन्ति, येन कारणेन तत्पूर्वकालीनैतिहासिकं तथ्यज्ञानं भवति ।

**प्रक्रियाकौमुदीकार : श्रीरामचन्द्र :- (सं. १४८०)** रामचन्द्राचार्येण पाणिनीयव्याकरणोपरि ''प्रक्रियाकौमुदी नाम ग्रन्थरचना कृता । अस्मिन् ग्रन्थे अष्टाध्याय्याः समस्तसूत्राणां निर्देशो न वर्तते । पाणिनीयव्याकरणशास्त्रे प्रविविक्षूणां विद्यार्थिनां कृते अस्य ग्रन्थस्य रचना कृता वर्तते । अतः ग्रन्थकर्त्रा रामचन्द्रेण सरलया रीत्या सरलशब्दैश्च रचना कृता वर्तते । अस्य ग्रन्थस्य प्रधानं प्रयोजनं प्रक्रियाज्ञानं वर्तते । (५४)

रामचन्द्रस्य वंशः शेषवंशः कथ्यते । व्याकरण परम्परायां शेषवंशः अतीव प्रसिद्धः ।अस्मिन् वंशे समुत्पन्नैः नैकैः वैयाकरणैः पाणिनीयव्याकरणोपरि ग्रन्थाः लिखिताः । तस्य पितुर्नाम कृष्णाचार्यः । तस्य पुत्रेण नृसिंहेण धर्मतत्वालोकस्यारम्भे स्वपितुः अष्टव्याकरणज्ञातारूपेण वर्णनं कृतं वर्तते । रामचन्द्रेण स्वपितुः सकाशात्, एवञ्च श्रीगोपालाचार्यसकाशात् विद्याध्ययनं कृतमिति निर्देशो लभ्यते । रामचन्द्रेण स्वग्रन्थनिर्माणकालनिर्देशो न कृतः । किन्तु प्रक्रियाकौमुद्याः सम्पादकेन लिखितं (५५) यत्-हेमाद्रिणा स्वरघुवंशटीकायां प्रक्रियाकौमुद्याः, एवं तस्य प्रासादटीकायाः उद्धरणद्वयं प्रदत्तम् । तदनुसारेण रामचन्द्रस्य, एवं तस्य पौत्रस्य विठ्ठलस्य कालः ख्रिस्ताब्देः १४ (चतुर्दश) शतकम् अस्ति ।

# पाद टिप्पणी

## अध्याय-१

१. मिश्र गोमतीप्रसाद शास्त्री, लघुसिध्धान्तकौमुदी; श्रीजी मुद्रणालयः, १९८१, प्रस्तावना पृ. २७३।

२. पं. शिवदत्त बदरीलालः, वैयाकरणसिध्धान्तकौमुदी, वेंकटेश्वर प्रेस, मुम्बई, वि. सं. १९७१, प्रस्तावना पृष्ठम् -६-७।

३. श्रीतत्वनिधिः पं. शिवदत्त-वैयाकरणसिध्धान्तकौमुद्याम् पृ. ७ तः उद्धृतम्।

४. मीमांसक युधिष्ठिरः, 'सस्कृतव्याकरणका इतिहास पृ. ५१, ५९४।

५. तत्रैव ग्रन्थे पृष्ठम् १३७।

६. मिश्र गोमतीप्रसादशास्त्री, लघुसिध्धान्तकौमुदी, श्रीजीमुद्रणालयः, वाराणसी, प्राक्कथम्। बोपदेवः कविकल्पद्रुमः।

७. अत्र प्राचीनाचार्याणाम् उल्लेखक्रमः अष्टाध्याय्यां प्राप्तसूत्रक्रमानुसारेण गृहीतः।

८. वायुपुराणम् ६०-६३। ?

९. विशेषस्तु मीमांसक युधिष्ठिरस्य संस्कृत व्याकरणशास्त्र का इतिहास पृ - १२६।

१०. विशेषस्तु तत्रैव पृ १०३ - १०४।

११. विशेषस्तु तत्रैव पृ ११५ - १२२।

१२. गणपाठ : ६ - ४ - ८६।

१३. विशेषस्तु मिमांसक युधिष्ठरस्य संस्कृतव्याकरणशास्त्रका इतिहास पृ ३४०।

१४. सिध्धहैमव्याकरण् पृ ३४०।

१५ विशेषस्तु मीमांसक युधिष्ठिरस्य संस्कृत व्याकरणका इतिहास पृ १२६ - १२८।

१६. विशेषस्तु तत्रैव पृ १११ - ११३।

१७. विशेषस्तु तत्रैव पृ ११३ - ११५। महाभाष्यम् १, १.२० ५६, ३२, ९९।

१८. निरुक्ते १-१२, १३-३१।

१९. विशेषस्तु मीमांसक युधिष्ठिरस्य संस्कृत व्याकरणशास्त्रका इतिहास पृ १०५ - १०८।

२०. विशेषस्तु तत्रैव पृ. १०८ - ११०।

२१. पाणिनिस्त्वाहिको दाक्षीपुत्र: शालङ्किपाणिनौ। शालोत्तरीय........। त्रिकाण्डकोषे मीमांसक-युधिष्ठिरस्य संस्कृत साहित्यका इतिहास पृ. १२९, ग्रन्थे उद्धृतं पद्यम्।

२२. -श्रीपण्डया ची.ज., संस्कृत व्याकरणका लधु इतिहास पृ. ८।

२३. तत्रैव पृ ८।

२४. श्री मीमांसक युधिष्ठिरस्य संस्कृत व्याकरणका इतिहास पृ. १३७.।

२५. तत्रैव पृ. १२९।

२६. तत्रैव पृ. १३४।

२७. श्री पण्डया ची. ज. संस्कृत व्याकरणशास्त्रका लधुइतिहास पृ. ८।

२८. तत्रैव पृ. ८।

२९. तत्रैव पृ. ८।

३०. तत्रैव पृ. ९।

| अध्याय : | पाद:१ | पाद:२ | पाद:३ | पाद:४ | सम्मील्य |
|---|---|---|---|---|---|
| १ | ०७४ | ०७३ | ०९३ | १०९ | ३४९ |
| २ | ०७१ | ०३८ | ०७३ | ०८५ | २६७ |
| ३ | १५० | १८८ | १०६ | ११७ | ६३१ |
| ४ | १७६ | १४४ | १६५ | १४४ | ६२९ |
| ५ | १३५ | १४० | ११९ | १६० | ५५४ |
| ६ | २१८ | १९९ | १३८ | १७५ | ७३० |
| ७ | १०३ | ११८ | १२० | ०९७ | ४३८ |
| ८ | ०७४ | १०८ | ११७ | ०६८ | ३६७ |
| | | | | | **३९६५** |

३१. तत्रैव पृ ९ ।

३२. तत्रैव पृ. ९-१०। लक्ष्मी टीका, वैयाकरणसिध्धान्तकौमुदी, भूमिकातः।

३३. तत्रैव पृष्ठे १६।

३४. तत्रैव पृष्ठे-१६ (१) कौपिञ्जल हास्तिपदादण् (४, ३.१३२), (२) आथर्वणिकः

३५. लघुसिद्धान्त कौमुदी, परिशिष्ट पृ. २७३।

३६. शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्।
पतञ्जलिकृतं महाभाष्यम् पृ. १.
काशी संस्कृत ग्रन्थमाला नं. १५३
प्रका. चौखम्बा संस्कृत सिरीझ ऑफिस, बनारस,
वि. सं २०११, ख्रिस्ताब्दः १९५४।

३७. महाभाष्ये पृ. ६-वृत्तिस्तर्हि कस्मान्न भवति महत्कष्टं श्रित इति। सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यते इति वक्तव्यम्। यदि सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इत्युच्यते। देवदत्तस्य गुरुकुलं देवदत्तस्य गुरुपुत्रो देवदत्तस्य दासभार्येत्यत्र वृत्तिर्न प्राप्नोति। अगुरुपुत्रादीनामिति वक्तव्यम्। तत्तर्हि वक्तव्यं सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यते अगुरुपुत्रादीनामिति। न वक्तव्यम्। वृत्तिस्तर्हि कस्मान्न भवति। अगमकत्वात्। इह समानार्थेन वाक्येन भवितव्यं समासेन च।

टीका-(प्रदीप) - वृत्तिस्तर्हि कस्मादिति। सविशेषणानामिति। वृत्तिर्नेति वचनात् षत्वादि भवत्येव। पूर्वोक्तानुसारेणायमपि न्यायः एवोक्तः न वक्तव्यमिति। न्यायसिद्धत्वात्। इह समानार्थेनेति।
प्रदीपव्याख्यासहितं महाभाष्यम्। पृ. ६

३८. ''महाभाष्यप्रदीपोद्योतः''।
नागेश विरचितः - पृष्ठम्-१,
बहुवल्लभशर्मणा परिशोधितः,
शकाब्दः १८२३।

३९ उपज्ञोपक्रमं तदादित्वे ॥६८॥ (स. ३, ३.१२६)।
पृ. २१५।
चान्द्रव्याकरणम्।
चन्द्रगोमिना विरचितम् - भागः-१ (विभागः-१-३)।
प्रका-क्षितीशचन्द्र चेटरजी शास्त्रि, पूनाः।
ख्रिस्ताब्दः-१९५३

४० ''उपज्ञोपक्रमं तदाद्याचिख्यासायाम् (२, ४.२१)।
जयादित्य विरचिता पाणिनीयव्याकरर्ण सूत्रवृत्तिः '' काशिका '',
प्रका.- बालशास्त्रि, बनारस,
ख्रिस्ताब्दः १९७६।

४१ सरस्वती-कण्ठाभरणम्। पृ-११०
मद्रपुरीय विश्वविद्यालय संस्कृत-ग्रन्थावलिः - ११।
प्रका. डॉ. सी. कुन्हानराजा,
ख्रिस्ताब्दः - १९३७।

४२ कृतषष्ठ्यन्तसमासे तदादिकथने ह्युपक्रमोपज्ञे ।
कन्थोशीनरदेशे नाम्न्यव्ययपूर्वकश्च पथः ॥ ७ ॥
वामनीय-लिङ्गानुशासनम् - पृ. -९,
(स्वोपज्ञवृत्तिसहितम्)।
प्रका. भारतीय-प्राच्यविद्या प्रतिष्ठानम् ,
३१/१४४, लालकोठी, अलवर गेट, अजमेर,
वि. सं. २०२१।

४३ नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
उद्धर्तुकामः सनकादिसिद्धानेतद् विमर्शे शिवसूत्रजालम् ॥

४४ उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।
तं ग्रन्थं वार्तिकं विद्यात् वार्तिकज्ञाः विचक्षणाः॥ आहुर् मनीषिणः/

४५. उदक् च विपाशः (पा-४, २.७४) तमे सूत्रे लिखितायां वृत्त्यामनुसृत्य।

४६ परिभाषेन्दुशेखरः।
नागोजीभट्ट कृतः पृष्ठ क्रमांक २ ।

४७ भट्टोजिदीक्षितचरणानां वैयाकरणसिद्धान्तकौमुद्यां १८० तमे सूत्रे -
''आपञ्चमपरिसमाप्तेरधिकारोऽयम्। ''
पणशीकरः, तत्वबोधिनी समाख्याव्याख्या संवलिता सिद्धान्तकौमुदी, पृ. ४१,
निर्णयसागर :, ख्रिस्ताब्दः १९१५।

४८ द्रष्टव्यम् परिशिष्टम् - २।

४९ पृष्ठक्रमांक - ९२।

५० प्राच्यविद्यामन्दिरस्य प्रकाशित पुस्तक विभागे प्राप्तपुस्तकस्य प्रथमानि अन्तिमानि च चत्वारि पृष्ठानि नष्टानि।

५१ विशेषस्तु द्रष्टव्यं परिशिष्टम् - १।

५२ प्रोवाच भगवान् कात्यस्तेनासिद्धिर्यणस्तु ते।
महाभाष्यम् ३। २। ३।

५३ विशेषस्तु संस्कृतव्याकरणशास्त्रका इतिहास इति पुस्तके द्रष्टव्यम्।

५४. श्रीमद् विठ्ठलमानम्य पाणिन्यादिमुनीन् गुरून् ।
प्रक्रियाकौमुदीं कुर्मः पाणिनीयानुसारिणीम् ॥

(प्रक्रियाकौमुदी - पूर्वार्धम्)
श्रीमद्रामचन्द्र प्रणीता (विठ्ठलाचार्यकृतया प्रसादाख्ययाटीका सहिता)

५५ प्रस्तावना ।